श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

## त्रिषष्टितमः सर्गः

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीसीतारामाभ्यां नमः

श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## त्रिषष्टितमः सर्गः

*दधिमुखान्मधुवनविध्वंसवार्तामाकर्ण्य सुग्रीवस्य हनुमदादीनां साफल्यविषयेऽनुमानम्*

ततो मूर्ध्ना निपतितं वानरं वानरर्षभः।
दृष्ट्वैवोद्विग्नहृदयो वाक्यमेतदुवाच ह॥ ५.६३.१ ॥

उत्तिष्ठोत्तिष्ठ कस्मात् त्वं पादयोः पतितो मम।
अभयं ते प्रदास्यामि सत्यमेवाभिधीयताम्॥ ५.६३.२ ॥

किं सम्भ्रमाद्धितं कृत्स्नं ब्रूहि यद् वक्तुमर्हसि।
कच्चिन्मधुवने स्वस्ति श्रोतुमिच्छामि वानर॥ ५.६३.३ ॥

स समाश्वासितस्तेन सुग्रीवेण महात्मना।
उत्थाय स महाप्राज्ञो वाक्यं दधिमुखोऽब्रवीत्॥ ५.६३.४ ॥

नैवर्क्षरजसा राजन् न त्वया ना च वालिना।
वनं निसृष्टपूर्वं ते नाशितं तत्तु वानरैः॥ ५.६३.५ ॥

न्यवारयमहं सर्वान् सहैभिर्वनचारिभिः।
अचिन्तयित्वा मां हृष्टा भक्षयन्ति पिबन्ति च॥ ५.६३.६ ॥

एभिः प्रधर्षणायां च वारितं वनपालकैः।
मामप्यचिन्तयन् देव भक्षयन्ति वनौकसः॥ ५.६३.७ ॥

शिष्टमत्रापविध्यन्ति भक्षयन्ति तथापरे।
निवार्यमाणास्ते सर्वे भ्रुकुटिं दर्शयन्ति हि॥ ५.६३.८ ॥

इमे हि संरब्धतरास्तदा तैः सम्प्रधर्षिताः।
निवार्यन्ते वनात् तस्मात् क्रुद्धैर्वानरपुङ्गवैः॥ ५.६३.९ ॥

ततस्तैर्बहुभिर्वीरैर्वानरैर्वानरर्षभाः।
संरक्तनयनैः क्रोधाद्धरयः सम्प्रधर्षिताः॥ ५.६३.१० ॥

पाणिभिर्निहताः केचित् केचिज्जानुभिराहताः।
प्रकृष्टाश्च तदा कामं देवमार्गं च दर्शिताः॥ ५.६३.११ ॥

एवमेते हताः शूरास्त्वयि तिष्ठति भर्तरि।
कृत्स्नं मधुवनं चैव प्रकामं तैश्च भक्ष्यते॥ ५.६३.१२ ॥

एवं विज्ञाप्यमानं तं सुग्रीवं वानरर्षभम्।
अपृच्छत् तं महाप्राज्ञो लक्ष्मणः परवीरहा॥ ५.६३.१३ ॥

किमयं वानरो राजन् वनपः प्रत्युपस्थितः।
किं चार्थमभिनिर्दिश्य दुःखितो वाक्यमब्रवीत्॥ ५.६३.१४ ॥

एवमुक्तस्तु सुग्रीवो लक्ष्मणेन महात्मना।
लक्ष्मणं प्रत्युवाचेदं वाक्यं वाक्यविशारदः॥ ५.६३.१५ ॥

आर्य लक्ष्मण सम्प्राह वीरो दधिमुखः कपिः।
अङ्गदप्रमुखैर्वीरैर्भक्षितं मधु वानरैः॥ ५.६३.१६ ॥

नैषामकृतकार्याणामीदृशः स्याद् व्यतिक्रमः।
वनं यदभिपन्नास्ते साधितं कर्म तद् ध्रुवम्॥ ५.६३.१७ ॥

वारयन्तो भृशं प्राप्ताः पाला जानुभिराहताः।
तथा न गणितश्चायं कपिर्दधिमुखो बली॥ ५.६३.१८ ॥

पतिर्मम वनस्यायमस्माभिः स्थापितः स्वयम्।
दृष्टा देवी न सन्देहो न चान्येन हनूमता॥ ५.६३.१९ ॥

न ह्यन्यः साधने हेतुः कर्मणोऽस्य हनूमतः।
कार्यसिद्धिर्हनुमति मतिश्च हरिपुङ्गवे॥ ५.६३.२० ॥

व्यवसायश्च वीर्यं च श्रुतं चापि प्रतिष्ठितम्।
जाम्बवान् यत्र नेता स्यादङ्गदश्च महाबलः॥ ५.६३.२१ ॥



www.prapatti.com

हनूमांश्चाप्यधिष्ठाता न तत्र गतिरन्यथा।
अङ्गदप्रमुखैर्वीरैर्हतं मधुवनं किल॥ ५.६३.२२ ॥

विचित्य दक्षिणामाशामागतैर्हरिपुङ्गवैः।
आगतैश्चाप्रधृष्यं तद्धतं मधुवनं हि तैः॥ ५.६३.२३ ॥

धर्षितं च वनं कृत्स्नमुपयुक्तं तु वानरैः।
पातिता वनपालास्ते तदा जानुभिराहताः॥ ५.६३.२४ ॥

एतदर्थमयं प्राप्तो वक्तुं मधुरवागिह।
नाम्ना दधिमुखो नाम हरिः प्रख्यातविक्रमः॥ ५.६३.२५ ॥

दृष्टा सीता महाबाहो सौमित्रे पश्य तत्त्वतः।
अभिगम्य यथा सर्वे पिबन्ति मधु वानराः॥ ५.६३.२६ ॥

न चाप्यदृष्ट्वा वैदेहीं विश्रुताः पुरुषर्षभ।
वनं दत्तवरं दिव्यं धर्षयेयुर्वनौकसः॥ ५.६३.२७ ॥

ततः प्रहृष्टो धर्मात्मा लक्ष्मणः सहराघवः।
श्रुत्वा कर्णसुखां वाणीं सुग्रीववदनाच्च्युताम्॥ ५.६३.२८ ॥

प्राहृष्यत भृशं रामो लक्ष्मणश्च महायशाः।
श्रुत्वा दधिमुखस्यैवं सुग्रीवस्तु प्रहृष्य च॥ ५.६३.२९ ॥

वनपालं पुनर्वाक्यं सुग्रीवः प्रत्यभाषत।
प्रीतोऽस्मि सोऽहं युद्भुक्तं वनं तैः कृतकर्मभिः॥ ५.६३.३० ॥

धर्षितं मर्षणीयं च चेष्टितं कृतकर्मणाम्।
गच्छ शीघ्रं मधुवनं संरक्षस्व त्वमेव हि।
शीघ्रं प्रेषय सर्वांस्तान् हनूमत्प्रमुखान् कपीन्॥ ५.६३.३१ ॥

इच्छामि शीघ्रं हनुमत्प्रधानान्
शाखामृगांस्तान् मृगराजदर्पान्।

www.prapatti.com

प्रष्टुं कृतार्थान् सह राघवाभ्यां
श्रोतुं च सीताधिगमे प्रयत्नम्॥ ५.६३.३२॥

प्रीतिस्फीताक्षौ सम्प्रहृष्टौ कुमारौ
दृष्ट्वा सिद्धार्थौ वानराणां च राजा।
अङ्गैः प्रहृष्टैः कार्यसिद्धिं विदित्वा
बाह्वोरासन्नामतिमात्रं ननन्द॥ ५.६३.३३॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे त्रिषष्टितमः सर्गः॥

www.prapatti.com